

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## चतुर्थकाण्डे प्रथमः प्रश्नः

### अग्निचित्यङ्गमन्त्रपाठाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

युञ्जानः प्रथमम्मनस्तत्वाय सविता धियः। अग्निञ्ज्योतिर्निचाय्य पृथिव्या अद्ध्याऽभरत्॥
युक्त्वाय मनसा देवान्थ् सुवर्यतो धिया दिवम्। बृहज्ज्योतिः करिष्यतः सविता प्र सुवाति तान्॥
युक्तेन मनसा वयन्देवस्य सवितुः सवे। सुवर्गेयाय शक्त्यै॥ युञ्जते मन उत युञ्जते धियो विप्रा
विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन् ॥ [१] ॥ मही देवस्य सवितुः परि-
ष्टुतिः॥ युजे वाम्ब्रह्म पूर्व्यन्नमोभिर् वि श्लोका यन्ति पथ्येव सूराः। शृण्वन्ति विश्वे अमृतस्य
पुत्रा आ ये धामानि दिव्यानि तस्थुः॥ यस्य प्रयाणमन्वन्य इद्ययुर् देवा देवस्य महिमान-
मर्चतः। यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना॥ देव सवितः प्र
सुव यज्ञम्प्र सुव ॥ [२] ॥ यज्ञपतिम्भगाय दिव्यो गन्धर्वः। केतपूः केतन्नः पुनातु वाचस्पतिर्
वाचमद्य स्वदाति नः॥ इमन्नो देव सवितर् यज्ञम्प्र सुव देवायुवꣳ सखिविदꣳ सत्राजितन्ध-
नजितꣳ सुवर्जितम्॥ ऋचा स्तोमꣳ समर्द्धय गायत्रेण रथन्तरम्। बृहद्गायत्रवर्तनि॥ देवस्य
त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम् पूष्णो हस्ताभ्याङ्गायत्रेण छन्दसाऽऽददेऽङ्गिरस्वदभ्रिरसि
नारि ॥ [३] ॥ रसि पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन त्वा छन्दसाऽऽद-
देऽङ्गिरस्वद्बभ्रिरसि नारिरसि त्वया वयꣳ सधस्थ आग्निꣳ शकेम खनितुम्पुरीष्यञ्जागतेन त्वा
छन्दसाऽऽददेऽङ्गिरस्वद्धस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम्। तया ज्योतिरजस्रमिद-
ग्निङ्खात्वी न आ भरा*नुष्टुभेन त्वा छन्दसा ऽऽददेऽङ्गिरस्वत् ॥ [४] ॥

(इद् यज्ञम्प्रसुव नारि रानुष्टुभेन त्वा छन्दसा त्रीणि च) ॥ १ ॥

इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या। तया देवाः सुतमा बभूवुरृतस्य
सामन्थ् सरमारपन्ती॥ प्रतूर्तँव्वाजिन्ना द्रव वरिष्ठामनु सँव्वतम्। दिवि ते जन्म परममन्त-
रिख्षे नाभिः पृथिव्यामधि योनिः॥ युञ्जाथाꣳ रासभँय्युवमस्मिन्यामे वृषण्वसू। अग्निम्भरन्त-
मस्मयुम्॥ योगेयोगे तवस्तरँव्वाजेवाजे हवामहे। सखाय इन्द्रमूतये॥ प्रतूर्व ॥ [५] ॥ न्नेह्य-
वक्रामन्नशस्ती रुद्रस्य गाणपत्यान् मयोभूरेहि। उर्वन्तरिख्षमन्विहि स्वस्तिगव्यूतिरभयानि
कृण्वन्न्॥ पूष्णा सयुजा सह। पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वदच्छेह्यग्निम्पुरीष्यमङ्गि-
रस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामोऽग्निम्पुरीष्यमङ्गिरस्वद्भरामः॥ अन्वग्निरुषसामग्र-
मख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य ॥ [६] ॥ पुरुत्रा च रश्मीननु द्यावापृथिवी
आ ततान॥ आगत्य वाज्यद्ध्वनः सर्वा मृधो वि धूनुते। अग्निꣳ सधस्थे महति चख्षुषा
नि चिकीषते॥ आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम्। भूम्या वृत्वाय नो ब्रूहि यतः
खनाम तँव्वयम्॥ द्यौस्ते पृष्ठम्पृथिवी सधस्थमात्माऽन्तरिख्षꣳ समुद्रस्ते योनिः। विख्याय
चख्षुषा त्वमभि तिष्ठ ॥ [७] ॥ पृतन्यतः॥ उत्क्राम महते सौभगायास्मादास्थानाद् द्रवि-
णोदा वाजिन्न्। वयꣳ स्याम सुमतौ पृथिव्या अग्निङ्खनिष्यन्त उपस्थे अस्याः॥ उदक्रमीद्
द्रविणोदा वाज्यर्वाऽकः स लोकꣳ सुकृतम्पृथिव्याः। ततः खनेम सुप्रतीकमग्निꣳ सुवो रुहाणा
अधि नाक उत्तमे॥ अपो देवीरुप सृज मधुमतीरयख्ष्माय प्रजाभ्यः। तासाꣳ स्थानादुज्जिह-
तामोषधयः सुपिप्पलाः॥ जिघर्म्य ॥ [८] ॥ ग्निम्मनसा घृतेन प्रतिख्यन्तम्भुवनानि विश्वा।
पृथुन्तिरश्चा वयसा बृहन्तँव्व्यचिष्ठमन्नꣳ रभसँव्विदानम्॥ आ त्वा जिघर्मि वचसा घृतेनाऽर-
ख्षसा मनसा तज्जुषस्व। मर्यश्रीः स्पृहयद् वर्णो अग्निर् नाऽभिमृशे तनुवा जर्हृषाणः॥ परि
वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद् रत्नानि दाशुषे॥ परि त्वाऽग्ने पुरँव्वयँव्विप्रꣳ सहस्य
धीमहि। धृषद्वर्णन्दिवेदिवे भेत्तारम्भङ्गुरावतः॥ त्वमग्ने द्युभिस्त्वमाशुशुख्षणिस्त्वमद्भ्यस्त्वम-
श्मनस्परि। त्वँव्वनेभ्य स्त्वमोषधीभ्य स्त्वन्नृणान्नृपते जायसे शुचिः ॥ [९] ॥

(प्रतूर्वन्थ्सूर्यस्यतिष्ठ जिघर्मि भेत्तारं विꣳशतिश्च) ॥ २ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम्पूष्णो हस्ताभ्याम्पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत् खनामि॥ ज्योतिष्मन्तन्त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम्। शिवम्प्रजाभ्योऽहिꣳसन्तम्पृथिव्याः सधस्थेऽग्निम्पुरीष्यमङ्गिरस्वत् खनामि॥ अपाम्पृष्ठमसि सप्रथा उर्वग्निम्भरिष्यदपरावपिष्ठम्। वर्द्धमानम्मह आ च पुष्करन्दिवो मात्रया वरिणा प्रथस्व॥ शर्म च स्थो ॥ [१०] ॥ वर्म च स्थो अच्छिद्रे बहुले उभे। व्यचस्वती सँव्वसाथाम्भर्तमग्निम्पुरीष्यम्॥ सँव्वसाथाꣳ सुवर्विदा समीची उरसा त्मना। अग्निमन्तर् भरिष्यन्ती ज्योतिष्मन्तमजस्रमित्॥ पुरीष्योऽसि विश्वभराः। अथर्वा त्वा प्रथमो निरमन्थदग्ने॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्द्ध्नो विश्वस्य वाघतः॥ तमु त्वा दध्यङ्ङृषिः पुत्र ईधे ॥ [११] ॥ अथर्वणः। वृत्रहणम्पुरन्दरम्॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनञ्जयꣳ रणेरणे॥ सीद होतः स्व उ लोके चिकित्वान्थ् सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर् देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदथ् सुदक्षः। अदब्धव्रतप्रमतिर् वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः॥ सꣳ सीदस्व महाꣳ असि शोचस्व ॥ [१२] ॥ देववीतमः। वि धूममग्ने अरुषम्मियेध्य सृज प्रशस्त दर्शतम्॥ जनिष्वा हि जेन्यो अग्रे अह्नाꣳ हितो हितेष्वरुषो वनेषु। दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥ [१३] ॥

(स्थ ईधे शोचस्व सप्तविꣳशतिश्च) ॥ ३ ॥

सन्ते वायुर् मातरिश्वा दधातूत्तानायै हृदयँव्विलिष्टम्। देवानाँय्यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यम्॥ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदः सुवः। वासो अग्ने विश्वरूपꣳ सवँव्ययस्व विभावसो॥ उदु तिष्ठ स्वद्ध्वरावा नो देव्या कृपा। दृशे च भासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः ॥ [१४] ॥ ऊर्द्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता। ऊर्द्ध्वो वाजस्य सनिता यदञ्जिभिर् वाघद्भिर् विह्वयामहे॥ स जातो गर्भो असि रोदस्योरग्ने चारुर् विभृत ओषधीषु। चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद् गाः॥ स्थिरो भव

वीड्वङ्ग आशुर् भव वाज्यर्वन्न्। पृथुर् भव सुषदस्त्वमग्नेः पुरीषवाहनः॥ शिवो भव ॥ [१५] ॥
प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः। मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षम्मा वनस्पतीन्॥
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भरन्नग्निम्पुरीष्यम्मा पाद्यायुषः पुरा॥ रासभो वाङ्क-
निक्रदथ् सुयुक्तो वृषणा रथे। स वामग्निम्पुरीष्यमाशुर् दूतो वहादितः॥ वृषाऽग्निँव्वृषणम्भर-
न्नपाङ्गर्भꣳ समुद्रियम्। अग्न आ याहि ॥ [१६] ॥ वीतय ऋतꣳ सत्यम्॥ ओषधयः प्रति
गृह्णीताऽग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मान्। व्यस्यन् विश्वा अमतीररातीर् निषीदन्नो अप
दुर्मतिꣳ हनत्॥ ओषधयः प्रति मोदध्वमेनम्पुष्पावतीः सुपिप्पलाः। अयँव्वो गर्भ ऋत्वियः
प्रत्नꣳ सधस्थमाऽसदत् ॥ [१७] ॥

(सुशास्तिभिःशिवो भव याहि षड्विꣳशच्च) ॥ ४ ॥

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः। सुशर्मणो बृहतः शर्मणि
स्यामग्नेरहꣳ सुहवस्य प्रणीतौ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय
चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अर-
ङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ मित्रः ॥ [१८] ॥ सꣳसृज्य
पृथिवीम्भूमिञ्च ज्योतिषा सह। सुजातञ्जातवेदसमग्निँव्वैश्वानरँव्विभुम्॥ अयक्ष्माय त्वा सꣳ
सृजामि प्रजाभ्यः। विश्वे त्वा देवा वैश्वानराः सꣳ सृजन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत्॥ रुद्राः
संभृत्य पृथिवीम्बृहज्ज्योतिः समीधिरे। तेषाम्भानुरजस्र इच्छुक्रो देवेषु रोचते॥ सꣳसृष्टाँव्व-
सुभी रुद्रैर् धीरैः कर्मण्याम्मृदम्। हस्ताभ्याम्मृद्वीङ्कृत्वा सिनीवाली करोतु ॥ [१९] ॥ ताम्॥
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा। सा तुभ्यमदिते मह ओखान्दधातु हस्तयोः॥ उखा-
ङ्करोतु शक्त्या बाहुभ्यामदितिर् धिया। माता पुत्रँय्यथोपस्थे साऽग्निम्बिभर्तु गर्भ आ॥ मखस्य
शिरोऽसि यज्ञस्य पदे स्थः। वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वत् पृथिव्यसि रुद्रास्त्वा
कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदन्तरिक्षमस्या ॥ [२०] ॥ दित्यास्त्वा कृण्वन्तु जागतेन
छन्दसाऽङ्गिरस्वद् द्यौरसि विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद्दि-
शोऽसि ध्रुवाऽसि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायाऽदित्यै

रास्नाऽस्य दितिस्ते बिलङ्गृह्णातु पाङ्क्तेन छन्दसाऽङ्गिरस्वत्॥ कृत्वाय सा महीमुखाम्मृन्मयीय्योनिमग्नये। ताम्पुत्रेभ्यः सम्प्रा यच्छददितिः श्रपयानिति ॥ [२१] ॥

(मित्रः करो त्वन्तरिक्षमसि प्र चत्वारि च) ॥ ५ ॥

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिरस्वद्विष्णुस्त्वा धूपयत्वङ्गिरस्वद् वरुणस्त्वा धूपयत्वङ्गिरस्वददितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थेऽङ्गिरस्वत् खनत्ववट देवानान्त्वा पत्नीर् ॥ [२२] ॥ देवीर् विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्दधतूखे धिषणास्त्वा देवीर् विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वदभीन्धतामुखे ग्ना स्त्वा देवीर् विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे वरूत्रयो जनयस्त्वा देवीर् विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वत् पचन्तूखे॥ मित्रैतामुखाम्पचैषा मा भेदि। एतान्ते परि ददाम्यभित्त्यै॥ अभीमां ॥ [२३] ॥ महिना दिवम्मित्रो बभूव सप्रथाः। उत श्रवसा पृथिवीम्॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम्। द्युम्नञ्चित्रश्रवस्तमम्॥ देवस्त्वा सवितोद् वपतु सुपाणिः स्वङ्गुरिः। सुबाहुरुत शक्त्या॥ अपद्यमाना पृथिव्याशा दिश आ पृण। उत्तिष्ठ बृहती भवोद्र्ध्वा तिष्ठ ध्रुवा त्वम्॥ वसवस्त्वाऽऽच्छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद् रुद्रास्त्वाऽऽच्छृन्दन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वाऽऽच्छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आ च्छृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ [२४] ॥

(पत्नी रिमाꣳ रुद्रास्त्वाऽऽच्छृन्दन्त्वे कान्नविꣳशतिश्च) ॥ ६ ॥

समास्त्वाऽग्न ऋतवो वर्द्धयन्तु सँव्वथ्सरा ऋषयो यानि सत्या। सन्दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः॥ सञ्चेद्ध्यस्वाऽग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय। मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु माऽन्ये॥ त्वामग्ने वृणते ब्राह्मणा इमे शिवो

अग्ने ॥ [२५] ॥ सँव्वरणे भवा नः । सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन्न् ॥ इहैवाग्ने अधि धारया रयिम्मा त्वा नि क्रन् पूर्वचितो निकारिणः । ख्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्द्धतान्ते अनिष्टृतः ॥ ख्षत्रेणाऽग्ने स्वायुः सꣳ रभस्व मित्रेणाऽग्ने मित्रधेये यतस्व । सजातानाम्मद्ध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ अति ॥ [२६] ॥ निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने । विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिन्दाः ॥ अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने ख्षत्रभृद् दीदिहीह । विश्वा आशाः प्रमुञ्चन् मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥ बृहस्पते सवितर् बोधयैनꣳ सꣳशितञ्चित् सन्तराꣳ सꣳ शिशाधि । वर्द्धयैनम्महते सौभगाय ॥ [२७] ॥ विश्व एनमनु मदन्तु देवाः ॥ अमुत्रभूयादध यद् यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद् देवानामग्ने भिषजा शचीभिः ॥ उद् वयन्तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ [२८] ॥

(इमे शिवो अग्ने ऽति सौभगाय चतुस्त्रिꣳशच्च) ॥ ७ ॥

ऊर्द्ध्वा अस्य समिधो भवन्त्यूर्द्ध्वा शुक्रा शोचीꣳष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथ आऽनक्ति मद्ध्वा घृतेन ॥ मद्ध्वा यज्ञन्नख्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद् देवः सविता विश्ववारः ॥ अच्छायमेति शवसा घृतेनेडानो वह्निर् नमसा । अग्निꣳ स्रुचो अद्ध्वरेषु प्रयथ्सु ॥ स यख्षदस्य महिमानमग्नेः स ॥ [२९] ॥ ई मन्द्रासु प्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥ द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥ ते अस्य योषणे दिव्ये न योनावुषासानक्ता । इमँय्यँज्ञमवतामद्ध्वरन्नः ॥ दैव्या होतारावूर्द्ध्वमद्ध्वरन्नोऽग्नेर् जिह्वामभि गृणीतम् । कृणुतन्नः स्विष्टिम् ॥ तिस्रो देवीर् बर्हिरेदꣳ सदन्त्विडा सरस्वती ॥ [३०] ॥ भारती । मही गृणाना ॥ तन्नस्तुरीपमद्भुतम्पुरुख्षु त्वष्टा सुवीरम् । रायस्पोषँव्वि ष्यतु नाभिमस्मे ॥ वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ॥ अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदञ्जुषन्ताम् ॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीन्द्या ॥ [३१] ॥ मुतेमाङ्कस्मै देवाय हविषा विधेम ॥ यः प्राणतो निमिषतो महित्वैक

इद् राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषँय्यस्य देवाः। यस्य छायाऽमृतँय्यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सह ॥ [३२] ॥ ऽऽहुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥ यङ्क्रन्दसी अवसा तस्तभाने अभ्यैक्षेताम्मनसा रेजमाने। यत्राधि सूर उदितौ व्येति कस्मै देवाय हविषा विधेम॥ येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितँय्येन नाकः। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥ आपो ह यन्महतीर् विश्व ॥ [३३] ॥ मायन् दक्षन्दधाना जनयन्तीरग्निम्। ततो देवानान्निरवर्त्ततासुरेकः कस्मै देवाय हविषा विधेम॥ यश्चिदापो महिना पर्यपश्यद्दक्षन्दधाना जनयन्तीरग्निम्। यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ [३४] ॥

(अग्नेः स सरस्वती द्याꣳ सह विश्वं चतुस्त्रिꣳशच्च) ॥ ८ ॥

पञ्चशती २९-३४: (ऊद्र्ध्वा यः प्राणतो य आत्मदा यस्येमे यङ्क्रन्दसी येन द्यौ रापो ह यत् ततो देवानां यश्चिदापो यो देवेषु नव)

---

आकूतिमग्निम्प्रयुजꣳ स्वाहा मनो मेधामग्निम्प्रयुजꣳ स्वाहा चित्तँव्विज्ञातमग्निम्प्रयुजꣳ स्वाहा वाचो विधृतिमग्निम्प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा विश्वे देवस्य नेतुर् मर्तो वृणीत सख्यँव्विश्वे राय इषुद्ध्यसि द्युम्नँव्वृणीत पुष्यसे स्वाहा मा सु भित्था मा सु रिषो दृꣳहस्व वीडयस्व सु। अंब धृष्णु वीरयस्वा ॥ [३५] ॥ ऽग्निश्चेदङ्करिष्यथः॥ दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृताऽसि। जुष्टन्देवानामिदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन्न्॥ मित्रैतामुखान्तपैषा मा भेदि। एतान्ते परि ददाम्यभित्त्यै॥ द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रो अद्भुतः॥ परस्या अधि सँव्वतोऽवराꣳ अभ्या ॥ [३६] ॥ तर। यत्राहमस्मि ताꣳ अव॥ परमस्याः परावतो रोहिदश्व इहाऽऽ*गहि। पुरीष्यः पुरुप्रियोऽग्ने त्वन्तरा मृधः॥ सीद त्वम्मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान्। मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर् वि भाहि॥ अन्तरग्ने रुचा त्वमुखायै सदने स्वे। तस्यास्त्वꣳ हरसा तपन् जातवेदः शिवो भव॥ शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम्। शिवाः कृत्वा दिशः सर्वाः स्वाँय्योनिमिहाऽऽसदः ॥ [३७] ॥

(वीर्यस्वा ऽऽ तपन् विꣳशतिश्च) ॥ ९ ॥

यदंग्ने यानि कानि चाऽऽते दारूणि दध्मसि। तदंस्तु तुभ्यमिद् घृतन्तज्जुषस्व यविष्ठ्य॥ यदत्त्युंपजिह्विका यद् वम्रो अंतिसर्पंति। सर्वन्तदंस्तु ते घृतन्तज्जुषस्व यविष्ठ्य॥ रात्रिꣳरात्रिमप्रंयावम्भरन्तोऽश्वायेव तिष्ठंते घासमंस्मै। रायस्पोषेंण समिषा मदन्तोऽग्ने मा ते प्रतिंवेशा रिषाम॥ नाभा ॥ [३८] ॥ पृथिव्याः संमिधानमग्निꣳ रायस्पोषाय बृहते हंवामहे। इरंमदम्बृहदुंक्थय्यँजंत्रञ्जेतांरमग्निम्पृतंनासु सासहिम्॥ याः सेना अभीत्वंरीराव्याधिनीरुगंणा उत। ये स्तेना ये च तस्कंरास्ताꣳस्ते अग्नेऽपि दधाम्यास्ये॥ दꣳष्ट्राभ्याम्मलिम्लून् जंम्भ्यैस्तस्कंराꣳ उत। हनूंभ्याꣳ स्तेनान् भंगव स्ताꣳ स्त्वङ्खांद सुखांदितान्॥ ये जनेंषु मलिम्लंवः स्तेनासस्तस्कंरा वनें। ये ॥ [३९] ॥ कक्ष्वेंष्वघायव स्ताꣳ स्तें दधामि जंम्भयोः॥ यो अस्मभ्यमरातीयाद्यश्च नो द्वेषंते जनंः। निन्दाद्यो अस्मान् दिप्साच्च सर्वन्तम्मंस्मसा कुरु॥ सꣳशितम्मे ब्रह्म सꣳशितवँीर्यम्बलंम्। सꣳशितङ्क्षत्रञ्जिष्णु यस्याऽहमस्मि पुरोहितः॥ उदेषाम्बाहू अंतिरमुद्वर्च उदू बलंम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नंयामि ॥ [४०] ॥ स्वाꣳ अहम्॥ दृशानो रुक्म उर्व्या व्यंद्यौद्दुर्मर्षमायुः श्रिये रुंचानः। अग्निरमृतो अभवद्वयोभिर् यदेंनन्द्यौरजंनयथ् सुरेताः॥ विश्वा रूपाणि प्रति मुञ्चते कविः प्राऽसांवीद्भद्रन्द्विपदे चतुंष्पदे। वि नाकमख्यथ् सविता वरेण्योऽनु प्रयाणमुषसो वि राजति॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची। द्यावा क्षामा रुक्मो ॥ [४१] ॥ अन्तर् वि भांति देवा अग्निन्धारयन् द्रविणोदाः॥ सुपर्णोऽसि गरुत्मान् त्रिवृत् ते शिरो गायत्रञ्चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियम्पुच्छञ्छन्दाꣳस्यङ्गानि धिष्णियाः शफा यजूꣳषि नाम॥ सुपर्णोऽसि गरुत्मान् दिवंङ्गच्छ सुवः पत ॥ [४२] ॥

(नाभा वने ये नंयामि क्षामा रुक्मो ऽष्टात्रिꣳशच्च) ॥ १० ॥

अग्ने यय्ँयज्ञमंध्वरव्ँविश्वतः परिभूरसि। स इद्देवेषु गच्छति॥ सोम यास्ते मयोभुव ऊतयः सन्तिं दाशुषे। ताभिर् नोऽविता भव॥ अग्निर् मूर्द्धा >१ , भुवः > २॥ त्वन्नः सोम >३, या ते

धामानि >४॥ तथ् सवितुर् वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ अचित्ती यच्चकृमा दैव्ये जने दीनैर् दख्षैः प्रभूती पूरुषत्वता ॥ [४३] ॥ देवेषु च सवितर् मानुषेषु च त्वन्नो अत्र सुवतादनागसः॥ चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम्। यज्ञन्दधे सरस्वती॥ पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियन्धात्। ग्नाभिरच्छिद्रꣳ शरणꣳ सजोषा दुराधर्षङ्गृणते शर्म यꣳसत्॥ पूषा गा अन्वेतु नः पूषा रख्षत्वर्वतः। पूषा वाजꣳ सनोतु नः॥ शुक्रन्ते अन्यद्यजतन्ते अन्य ॥ [४४] ॥ द्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ तेऽवर्द्धन्त स्वतवसो महित्वनाऽऽनाकन्तस्थुरुरु चक्रिरे सदः। विष्णुर् यद्धाऽऽवद्वृषणम्मदच्युतँव्वयो न सीदन्नधि बर्हिषि प्रिये॥ प्र चित्रमर्कङ्गृणते तुराय मारुताय स्वतवसे भरद्ध्वम्। ये सहाꣳसि सहसा सहन्ते ॥ [४५] ॥ रेजते अग्ने पृथिवी मखेभ्यः॥ विश्वे देवा >५, विश्वे देवाः >६॥ द्यावा नः पृथिवी इमꣳ सिद्ध्रमद्य दिविस्पृशम्। यज्ञन्देवेषु यच्छताम्॥ प्र पूर्वजे पितरा नव्यसीभिर् गीर्भिः कृणुद्ध्वꣳ सदने ऋतस्य। आ नो द्यावापृथिवी दैव्येन जनेन यातम्महि वाँव्वरूथम्॥ अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्॥ स हव्यवाडमर्त्य उशिग् दूतश्चनोहितः। अग्निर् धिया समृण्वति॥ शन्नो भवन्तु>७ , वाजेवाजे> ८ ॥ [४६] ॥

(पुरुषत्वता यजतन्ते अन्यथ् सहन्ते चनोहितो ऽष्टौ च) ॥ ११ ॥

## समाप्ति कोर्वैः

(युञ्जान इमामगृभ्णन् देवस्य सन्ते वि पाजसा वसवस्त्वा समास्त्वोर् द्ध्वा अस्याकूतिं यदग्ने यान् यग्ने यय्यँज्ञ मेकादश)
(युञ्जानो वर्म च स्थ आदित्यस्त्वा भारती स्वाꣳ अहꣳ षट्चत्वारिꣳशत्)
(युञ्जानो वाजेवाजे)

॥ हरिः ॐ ॥

चतुर्थकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चाशत्यः |
|---|---|
| ११ | ४६ |

ॐ